# Mantrarajastotra from Brahmavaivarta Purana

# મન્ત્રરાજસ્તોત્રં અથવા બાણકૃતમ્ શિવસ્તોત્રમ્

## Document Information

Text title : mantrarAjastotra brahmavaivarta purANAntargatam

File name : mantrarAjastavaBVP.itx

Category : purana, stotra, shiva, mantra, stava, brahmavaivartapurANa

Location : doc_z_misc_general

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Description-comments : brahmavaivartapurANa brahmakhaNDaM adhyAya 19 shloka 55-80

Latest update : January 25, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 25, 2024

*sanskritdocuments.org*

# મન્ત્રરાજસ્તોત્રં અથવા બાણકૃતમ્ શિવસ્તોત્રમ્

બ્રહ્મવૈવર્તપુરાણાન્તર્ગતમ્ ।

સૌતિરુવાચ ।
ઇદં ચ કવચં પ્રોક્તં સ્તોત્રં ચ શૃણુ શૌનક ।
મન્ત્રરાજઃ કલ્પતરુર્વસિષ્ઠો દત્તવાન્ પુરા ॥ ૫૫॥

ૐ નમઃ શિવાય ।

બાણાસુર ઉવાચ ।
વન્દે સુરણાં સારં ચ સુરેશં નીલલોહિતમ્ ।
યોગીશ્વરં યોગબીજં યોગિનાં ચ ગુરોર્ગુરુમ્ ॥ ૫૬॥

જ્ઞાનાનન્દં જ્ઞાનરૂપં જ્ઞાનબીજં સનાતનમ્ ।
તપસાં ફલદાતારં દાતારં સર્વસમ્પદામ્ ॥ ૫૭॥

તપોરૂપં તપોબીજં તપોધનધનં વરમ્ ।
વરં વરેણ્યં વરદમીડ્યં સિદ્ધગણૈર્વરૈઃ ॥ ૫૮॥

કારણં ભુક્તિમુક્તીનાં નરકાર્ણવતારણમ્ ।
આશુતોષં પ્રસન્નાસ્યં કરુણામયસાગરમ્ ॥ ૫૯॥

હિમચન્દનકુન્દેન્દુકુમુદામ્ભોજસન્નિભમ્ ।
બ્રહ્મજ્યોતિસ્વરૂપં ચ ભક્તાનુગ્રહવિગ્રહમ્ ॥ ૬૦॥

વિષયાણાં વિભેદેન બિભ્રન્તં બહુરૂપકમ્ ।
જલરૂપમગ્નિરૂપમાકાશરૂપમીશ્વરમ્ ॥ ૬૧॥

વાયુરૂપં ચન્દ્રરૂપં સૂર્યરૂપં મહત્પ્રભુમ્ ।
આત્મનઃ સ્વપદં દાતું સમર્થમવલીલયા ॥ ૬૨॥

ભક્તજીવનમીશં ચ ભક્તાનુગ્રહકારકમ્ ।
વેદા ન શક્તા યં સ્તોતું કિમહં સ્તૌમિ તં પ્રભુમ્ ॥ ૬૩॥

અપરિચ્છિન્નમીશાનમહો વાઙ્મનસોઃ પરમ્ ।
વ્યાઘ્રચર્મામ્બરધરં વૃષભસ્થં દિગમ્બરમ્ ॥ ૬૪॥

ત્રિશૂલપટ્ટિશધરં સસ્મિતં ચન્દ્રશેખરમ્ ।
ઇત્યુક્ત્વા સ્તવરાજેન નિત્યં બાણઃ સુસંયતઃ ॥ ૬૫॥

પ્રણમત્ શઙ્કરં ભક્ત્યા દુર્વાસાશ્ચ મુનીશ્વરઃ ।
ઇદં દત્તં વસિષ્ઠેન ગન્ધર્વાય પુરા મુને ॥ ૬૬॥

કથિતં ચ મહાસ્તોત્રં શૂલિનઃ પરમાદ્ભુતમ્ ।
ઇદં સ્તોત્રં મહાપુણ્યં પઠેદ્ભક્ત્યા ચ યો નરઃ ॥ ૬૭॥

સ્નાનસ્ય સર્વતીર્થાનાં ફલમાપ્નોતિ નિશ્ચિતમ્ ।
અપુત્રો લભતે પુત્રં વર્ષમેકં શ‍ૃણોતિ યઃ ॥ ૬૮॥

સંયતશ્ચ હવિષ્યાશી પ્રણમ્ય શઙ્કરં ગુરુમ્ ।
ગલત્કુષ્ઠી મહાશૂલી વર્ષમેકં શ‍ૃણોતિ યઃ ॥ ૬૯॥

અવશ્યં મુચ્યતે રોગાત્ વ્યાસવાક્યમિતિ શ્રુતમ્ ।
કારાગારેઽપિ બદ્ધો યો નૈવ પ્રાપ્નોતિ નિર્વૃતિમ્ ।
સ્તોત્રં શ્રુત્વા માસમેકં મુચ્યતે બન્ધનાત્ ધ્રુવમ્ ॥ ૭૧॥

ભ્રષ્ટરાજ્યો લભેદ્રાજ્યં ભક્ત્યા માસં શ‍ૃણોતિ યઃ ।
માસં શ્રુત્વા સંયતશ્ચ લભેદ્ભ્રષ્ટધનો ધનમ્ ॥ ૭૨॥

યક્ષ્મગ્રસ્તો વર્ષમેકમાસ્થિકો યઃ શ‍ૃણોતિ ચેત્ ।
નિશ્ચિતં મુચ્યતે રોગાત્ શઙ્કરસ્ય પ્રસાદતઃ ॥ ૭૩॥

યઃ શ‍ૃણોતિ સદા ભક્ત્યા સ્તવરાજમિદં દ્વિજ ।
તસ્યાસાધ્યં ત્રિભુવને નાસ્તિ કિઞ્ચિચ્ચ શૌનક ॥ ૭૪॥

કદાચિદ્બન્ધુવિચ્છેદો ન ભવેત્ તસ્ય ભારતે ।
અચલં પરમૈશ્વર્યં લભતે નાત્ર સંશયઃ ॥ ૭૫॥

સુસંયતોઽતિભક્ત્યા ચ માસમેકં શ‍ૃણોતિ યઃ ।
અભાર્યો લભતે ભાર્યાં સુવિનીતાં સતીં રમામ્ ॥ ૭૬॥

મહામૂર્ખશ્ચ દુર્મેધા માસમેકં શ‍ૃણોતિ યઃ ।
બુદ્ધિં વિદ્યાં ચ લભતે ગુરૂપદેશમાત્રતઃ ॥ ૭૭॥

કર્મદુઃખી દરિદ્રશ્ચ માસં ભક્ત્યા શ‍ૃણોતિ યઃ ।

ધ્રુવં વિત્તં ભવેત્ તસ્ય શઙ્કરસ્ય પ્રસાદતઃ ॥ ૭૮॥

ઇહ લોકે સુખં ભુક્ત્વા કૃત્વા કીર્તિં સુદુર્લભામ્ ।
નાનાપ્રકારધર્મં ચ યાત્યન્તે શઙ્કરાલયમ્ ॥ ૭૯॥

પાર્ષદપ્રવરો ભૂત્વા સેવતે તત્ર શઙ્કરમ્ ।
યઃ શ‍ૃણોતિ ત્રિસન્ધ્યં ચ નિત્યં સ્તોત્રમનુત્તમમ્ ॥ ૮૦॥

ઇતિ શ્રીબ્રહ્મવૈવર્તે મહાપુરાણે બ્રહ્મખણ્ડે સૌતિશૌનકસંવાદે
સ્તવરાજોઽયમૂનવિંશોઽધ્યાયઃ ॥

brahmavaivartapurANa brahmakhaNDaM adhyAya 19 shloka 55-80

Encoded and proofread by
PSA Easwaran

---

*Mantrarajastotra from Brahmavaivarta Purana*
pdf was typeset on September 25, 2024

Please send corrections to *sanskrit@cheerful.com*